National Journal of
Hindi & Sanskrit Research

ISSN: 2454-9177
NJHSR 2025; 1(59): 207-209
© 2025 NJHSR
www.sanskritarticle.com

**निलेश गुप्ता**
शोधच्छात्रः, व्याकरणविभागः,
राष्ट्रियसंस्कृतविश्वविद्यालयः,
तिरुपतिः

**Correspondence:**
**निलेश गुप्ता**
शोधच्छात्रः, व्याकरणविभागः,
राष्ट्रियसंस्कृतविश्वविद्यालयः,
तिरुपतिः

# कृत्यप्रत्ययविमर्शः

**निलेश गुप्ता**

**सारांशः**

शोधनिबन्धेऽस्मिन् कृत्यप्रत्ययाः प्रतिपादिताः। प्रत्ययानां भेदान् उक्त्वा कृत्यप्रत्ययानां सामान्य-परिचयः प्रदर्शितवान्। कृदतिङ् इति सूत्रेण धात्वधिकारे एकशताधिकचतुर्विंशतिः (124) प्रत्ययाः उक्ताः। तेषु एकशताधिकचतुर्विंशतिः (124) कृत्प्रत्ययेषु सप्तप्रत्ययाः कृत्यप्रत्ययरूपेणापि व्यवह्रियन्ते। तेषां सप्तप्रत्ययानां सूत्राणि एकत्रीकृत्य सोदाहरणैः सह अर्थावलोचितम्।

**प्रस्तावना**

**"अपदं न प्रयुञ्जीत । न केवला प्रकृतिः प्रयोक्तव्या, नापि केवलं प्रत्ययः"**

इति पतञ्जलिना महाभाष्ये पदप्रयोजनत्वं निरूपितम्। अतः सूत्रकारः भगवान् पाणिनिः कृदन्तप्रत्ययानां पदसंज्ञायै **'कृत्तद्धितसमासाश्च"** सूत्रमिदं रचयामास।

प्रत्ययानाम् सप्त भेदाः सन्ति । ते एतादृशाः -

१) **सनादिप्रत्ययाः** - एते धातुभ्यः तथा प्रातिपदिकेभ्यः अनन्तरमागच्छन्ति । एते सर्वे **गुप्तिज्किद्भ्यः सन्** ३.१.५ इत्यतः **आयादय आर्धद्धातुके वा** ३.१.३१ एतेषु सूत्रेषु दीयन्ते ।

२) **विकरणप्रत्ययाः -** एते धातुभ्यः अनन्तरमागच्छन्ति । एते सर्वे **स्यतासी लृलुटोः** ३.१.३३ **इत्यतः लिङ्याशिष्यङ्** ३.१.८६ इति यावत् पाठ्यन्ते ।

३) **तिङ्-प्रत्ययाः** - एते धातुभ्यः अनन्तरमागच्छन्ति। एते प्रत्ययाः **तिप्तस्झिसिप्थस्थमिब्वस्मस्ताऽ-तांझथासाथांध्वमिड्वहिमहिङ्** ३.४.७८ अनेन सूत्रेण दीयन्ते।

४) **सुप्-प्रत्ययाः -** एते प्रातिपदिकेभ्यः अनन्तरमागच्छन्ति। एते सर्वे **स्वौजस्..** ४.१.२ अनेन सूत्रेण दीयन्ते ।

५) **स्त्री-प्रत्ययाः - अजाद्यतष्टाप्** ४.१.४ इत्यतः **दैवयज्ञिशौचिवृक्षिसात्यमुग्रिकाण्ठेविद्धिभ्योऽन्यतरस्याम्** ४.१.८१ एतेषु सूत्रेषु स्त्रीप्रत्ययाः पाठ्यन्ते ।

६) **तद्धितप्रत्ययाः - तद्धिताः** ४.१.७६ अस्मिन् अधिकारे पाठिताः सर्वे प्रत्ययाः तद्धितप्रत्ययाः सन्ति।

७) **कृत्-प्रत्ययाः** - एते धातुभ्यः अनन्तरमागच्छन्ति। तृतीयाध्याये पाठिताः सनादिभिन्नाः, विकरण-भिन्नाः तिङ्भिन्नाः सर्वे प्रत्ययाः कृत्-प्रत्ययाः भवन्ति । कृत्प्रत्ययाः कत्रार्थे कर्मार्थे भावार्थे च प्रयुज्यन्ते। यथा-

| | | |
|---|---|---|
| कर्त्रर्थे - | कृ तृच् | कर्ता |
| कर्मार्थे - | कृ तव्यत् | कर्तव्यम् |
| भावार्थे - | शिङ् तव्यत् | शयितव्यम् |

एतेषां कृत्प्रत्ययानां कृत्तद्धितसमासाश्च इति सूत्रेण प्रातिपदिकसंज्ञा विधीयते। तेन स्वादिप्रत्ययाः भवन्ति। एवञ्च सुप्तिङन्तं पदम् इत्यनेन पदसंज्ञा भवति । पदसंज्ञात्वेन एते प्रयोगार्हाः भवन्ति । तयोरेव कृत्यक्तखलर्थाः इति सूत्रेण कृत्यप्रत्ययाः भावकर्मार्थे व्यवह्रियन्ते।

कृदतिङ् इति सूत्रेण धात्वधिकारे एकशताधिकचतुर्विंशतिः (124) प्रत्ययाः उक्ताः। तेषु एकशताधिकचतुर्विंशतिः (124) कृत्प्रत्ययेषु सप्तप्रत्ययाः कृत्यप्रत्ययरूपेणापि व्यवह्रियन्ते। ते यथा- तव्य, तव्यत्, अनीयर्, यत्, ण्यत्, क्यप्, केलिमर् इति। एतेषां प्रत्ययानां कृत् संज्ञा अपि भवति, कृत्यसंज्ञा अपि भवति।

कृत्याधिकारे सप्तत्रिंशत् सूत्राणि सन्ति । ते अधः व्याख्यायन्ते –

**तव्यत्-तव्य-अनीयर् प्रत्ययाः**

**तव्यत्तव्यानीयरः** ३.१.९६ धातोः तव्यत्, तव्य, अनीयरित्येते प्रत्ययाः भवन्ति । यथा- कर्तव्यम् । कर्तव्यम् । करणीयम् ।
वसेस्तव्यत्कर्तरिणिच्च (वार्तिकम्) ॥ यथा वसतीति वास्तव्यः।

**केलिमर् प्रत्ययः**

केलिमर् उपसंख्यानम् (वार्तिकम्) ॥ यथा पचेलिमा माषाः। पक्तव्याः । भिदेलिमाः सरलाः भेत्तव्याः ।

**यत् प्रत्ययः**

**अचो यत्** ३.१.९७ अजन्ताद् धातोः यत् प्रत्ययः भवति। यथा- गेयम्, पेयम्, चेयम् आदयः।

**पोरदुपधात्** ३.१.९८ पवर्गान्ताद् धातोः अकारोपधात् यत् प्रत्ययो भवति। शप् शप्यम्। लभ् लभ्यम् ।

**शकिसहोश्च** ३.१.९९ शक्लृ शक्तौ, षह मर्षणे, अनयोर्धात्वोः यत् प्रत्ययो भवति । यथा- शक्यम् । सह्यम् ॥

**गदमदचरयमश्चानुपसर्गे** ३.१.१०० गद व्यक्तायां वाचि, मदी हर्षे, चर गतिभक्षणयोः, यम उपरमे, एतेभ्यश्च अनुपसर्गेभ्यो यत् प्रत्ययो भवति। गद्यम् । मद्यम् । चर्यम्। यम्यम् ।

**अवद्यपण्यवर्या गर्ह्यपणितव्यानिरोधेषु** ३.१.१०१ अवद्य पण्य वर्या इत्येते शब्दा गर्ह्य पणितव्य अनिरोध इत्येतेष्वर्थेषु निपात्यन्ते । अवद्यं पापम् । पण्यः कम्बलः। शतेन वर्या आदयः।

**वह्यं करणम्** ३.१.१०२ वहेर्धातोः करणे यत् प्रत्ययो निपात्यते। वहत्यनेन इति वह्यं शकटम्।

**अर्यः स्वामिवैश्ययोः** ३.१.१०३ ऋ गतौ, अस्माण्ण्यति प्राप्ते स्वामिवैश्ययोः अभिधेययोः यत् प्रत्ययो निपत्यते । अर्यः स्वामी। अर्यो वैश्यः।

**उपसर्या काल्या प्रजने** ३.१.१०४ उपसर्या इति निपात्यते काल्या चेत् प्रजने उपपूर्वात् सर्तेः यत् प्रत्ययः भवति । यथा- उपसर्या गौः। उपसर्या वडवा ।

**अजर्यं संगतम्** ३.१.१०५ जीर्यतेः नञ्पूर्वात् सङ्गते सङ्गमने कर्तरि यत् प्रत्ययो निपात्यते । अजर्यमार्यसङ्गतम् । अजर्यं नोऽस्तु सङ्गतम्।

**वदः सुपि क्यप् च** ३.१.१०६ वदेर्धातोः सुबन्तोः उपपदे अनुपसर्गे क्यप् प्रत्ययो भवति, चकाराद् यत् च। ब्रह्मोद्यम्, ब्रह्मवद्यम्। सत्योद्यम्, सत्यवद्यम्।

**भुवो भावे** ३.१.१०७ भवतेर्धातोः सुबन्ते उपपदेऽनुपसर्गे भावे क्यप् प्रत्ययो भवति। ब्रह्मणो भावो ब्रह्मभूयम् ।

**हनस्त च** ३.१.१०८ हन्तेर्धातोः सुबन्त उपपदेऽनुपसर्गे भावे क्यप् प्रत्ययो भवति । ब्रह्महत्या। अश्वहत्या।

**क्यप् प्रत्ययः**

**एतिस्तुशास्वृदृजुषः क्यप्** ३.१.१०९ एति स्तु शास् वृ दृ जुषित्येतेभ्यः क्यप् प्रत्ययो भवति। यथा- इत्यः, स्तुत्यः, शिष्यः, वृत्यः, आदृत्यः, जुष्यः आदयः।

**ऋदुपधाच्चाक्लृपिचृतेः** ३.१.११० ऋकारौपधाच् च धातोः क्यप् प्रत्ययो भवति क्लृपिचृती वर्जयित्वा । वृतु वृत्यम् । वृधु वृध्यम्।

**ई च खनः** ३.१.१११ खनेर्धातोः क्यप् प्रत्ययो भवति, ईकारश्च अन्तादेशः । खेयम्।

**भृञोऽसंज्ञायाम्** ३.१.११२ भृञो धातोः असंज्ञायां विषये क्यप् प्रत्ययो भवति। भृत्याः कर्मकराः। भर्तव्याः इत्यर्थः।

**मृजेर्विभाषा** ३.१.११३ मृजेर्धातोः विभाषा क्यप् प्रत्ययो भवति। परिमृज्यः, परिमार्ग्यः।

**राजसूयसूर्यमृषोद्यरुच्यकुप्यकृष्टपच्याव्यथ्याः** ३.१.११४ राजसुय सुर्य मृषोद्य रुच्य कुप्य कृष्टपच्य अव्यथ्य इत्येते शब्दाः क्यपि निपात्यन्ते । राज्ञा सोतव्यः, राजा वा इह सूयते राजसूयः क्रतुः। सरति सुवति व सूर्यः। मृषापूर्वस्य मृषोद्यम् । रोचतेऽसौ रुच्यः। कुप्यम्। कृष्टे पच्यन्ते कृष्टप्च्याः। न व्यथते अव्यथ्यः।

**भिद्योद्ध्यौ नदे** ३.१.११५ भिदेरुज्झेश्च क्यप् निपात्यते नदेऽभिधेये। उज्झेर्धत्त्वं च। भिनत्ति कूलं भिद्यः। उज्झति उदकमुद्ध्यः।

**पुष्यसिद्ध्यौ नक्षत्रे** ३.१.११६ पुषेः सिधेश्च अधिकरणे क्यप् निपात्यते नक्षत्रे अभिधेये । पुष्यन्ति अस्मिन्नर्थाः इति पुष्यः। सिध्यन्ति अस्मिन्निति सिद्ध्यः।

**विपूयविनीयजित्या मुञ्जकल्कहलिषु** ३.१.११७ निपूय विनीय जित्य इत्येते शब्दा निपात्यन्ते यथासङ्ख्यं मुञ्ज कल्क हलि इत्येतेषु अर्थेषु वोध्येषु। विपूर्वात् पवतेर्नयतेश्च तथा जयतेर्यति प्राप्ते कर्मणि क्यब् निपात्यते। विपूयो मुञ्जः। विपाव्यमन्यत्। विनीयः क्ल्कः। विनेयमन्यत्। जित्यो हलिः। जेयमन्यत् ।

**प्रत्यपिभ्यां ग्रहेश्छन्दसि** ३.१.११८ प्रति अपि इत्येवं पूर्वाद् ग्रहेः क्यप् प्रत्ययो भवति छन्दसि विषये । मत्तस्य न प्रतिगृह्णम् । तस्मान् न अपिगृह्यम् ।

**पदास्वैरिबाह्यापक्ष्येषु च** ३.१.११९ पदे अस्वैरिणि बाह्यायां पक्ष्ये चर्थे ग्रहेर्धातोः क्यप् प्रत्ययो भवति । अवगृह्यम् । प्रगृह्यं पदम्। अस्वैरी परतन्त्रः। गृह्यका इमे । बाह्यायम् ग्रामगृह्या सेना। नगरगृह्या सेना । ग्रामबहिर्भूता इत्यर्थः।

**विभाषा कृवृषोः** ३.१.१२० कृञो वृषश्च विभाषा क्यप् प्रत्ययो भवति। करोतेर्ण्यति प्राप्ते वर्षतेः ऋदुपधत्वात् नित्ये क्यपि प्राप्ते विभाषार्भ्यते। कृत्यम्, कार्यम् । वृष्यम्, वर्ष्यम्।

**युग्यं च पत्रे ३.१.१२१** युग्यम् इति निपात्यते पत्रं चेत् तद् भवति । पतत्यनेन इत् पत्रं वाहनमुच्यते। युग्यो गौः। युग्योऽश्वः। युग्यो हस्ती। युजेः क्यप् कुत्वं च निपात्यते ।

**अमावस्यदन्यतरस्याम् ३.१.१२२** अमाशब्दः सहार्थे वर्तते। तस्मिन्नुपपदे वसेर्धातोः कालेऽधिकरणे ण्यत् प्रत्ययो भवति, तत्र अन्यतरस्यां वृद्ध्यभावो निपात्यते । सह वसतोऽस्मिन् काले सूर्याचन्द्रमसौ इति अमावास्य, अमावस्या ।

**ण्यत् प्रत्ययः**

**ऋहलोर्ण्यत् ३.१.१२४** ऋवर्णान्ताद् धातोर्हलन्ताच् च ण्यत् प्रत्ययो भवति । कार्यम् । हार्यम्। धार्यम् । वाक्यम् । पाक्यम्।

**ओरावश्यके ३.१.१२५** उवर्णान्ताद् धातोः ण्यत् प्रत्ययो भवति आवश्यके द्योत्ये। यतोऽपवादः। लाव्यम् । पाव्यम् ।

**आसुयुवपिरपिलपित्रपिचमश्च ३.१.१२६** आङ्पूर्वात् सुनोतेः यु वपि रपि लपि त्रपि चम इत्येतेभ्यश्च ण्यत् प्रत्ययो भवति। यतोऽपवादः आसाव्यम्। याव्यम्। वाप्यम् । राप्यम्। लाप्यम्। त्राप्यम्। आचाम्यम्।

**आनाय्योऽनित्ये ३.१.१२७** आनाय्यः इति निपात्यते अनित्येऽभिधेये। नयतेराङ्पूर्वाण् ण्यदायादेशौ निपात्येते । आनाय्यो दक्षिणाग्निः।

**प्रणाय्योऽसंमतौ ३.१.१२८** प्रणाय्यः इति निपात्यतेऽसम्मतावभिधेये। प्रणाय्यश्चोरः।

**पाय्यसान्नाय्यनिकाय्यधाय्या मानहविर्निवाससामिधेनीषु ३.१.१२९** पाय्यादयः शब्दा निपात्यन्ते यथासङ्ख्यं माने हविषि निवासे सामिधेन्यां च अभिधेयायाम्। पाय्यं मानम् मेयमन्यत्। सानाय्यं हविः। संनेयमन्यत् । निकाय्यो निवासः। निचेयमन्यत्। सामिधेनीशब्द ऋग्विशेषस्य वाचकः। तत्र च धाय्या इति न सर्वा सामिधेनी उच्यते ।

**क्रतौ कुण्डपाय्यसंचाय्यौ ३.१.१३०** कुण्डशब्दे तृतीयान्त उपपदे पिबतेर्धातोरधिकरणे यत् प्रत्ययो निपात्यते युक् च। कुण्डेन पीयतेऽस्मिन् सोमः इति कुण्डपाय्यः क्रतुः। यतोऽनावः इति स्वरः। सम्पूर्वाच् चिनोतेः ण्यदायादेशौ निपात्येते। सञ्चीयतेऽस्मिन् सोमः इति सञ्चाय्यः क्रतुः ।

**अग्नौ परिचाय्योपचाय्यसमूह्याः ३.१.१३१** परिचाय्य उपचाय्य समूह्य इत्येते शब्दा निपात्यन्ते अग्नावभिधेये। परिपूर्वतुपपूर्वाच् च चिनोतेर्ण्यदायादेशौ निपात्येते । परिचाय्यम्। उपचाय्यः। सम्पूर्वाद् वहेः सम्प्रसारणं दीर्घत्वं च निपात्यते । समूह्यं चिन्वीत पशुकामः।

**चित्याग्निचित्ये च ३.१.१३२** चित्यशब्दोऽग्निचित्याशब्दश्च निपात्येते। नीयतेऽसौ चित्योऽग्निः। अग्निचयनम् एव अग्निचित्या। अग्नावित्येव। चेयमन्यत् ।

**निष्कर्षः**

कृदन्तज्ञानं विना व्याकरणज्ञानं न सम्भवति। भाषायां केषुचित् स्थानेषु क्रियास्थाने सर्वे कृदन्तानां व्यवहारः क्रियन्ते, संस्कृतसाहित्ये च कृदन्तप्रयोगः प्रचुरः दृश्यते । तत्र कृत्यप्रत्ययानां अत्यन्तं महत्त्वं विद्यते। इत्थं च **"कृत्यप्रत्ययविमर्शः"** इति विषयोऽयं यथामतिः प्रतिपाद्य अत्र विरम्यते ।

**परिशीलितग्रन्थाः**


- **पाणिनीय अष्टाध्यायी** SINDHU CHARAN BOSE, PANINI OFFICE, 1898
- **वैयाकरणसिद्धान्तकौमुदी** चौखम्बा सुरभारती प्रकाशन, वाराणसी
- **काशिकावृत्तिः** तारा पब्लिकेशन्स, वाराणसी, 1966
- **पतञ्जलिकृत महाभाष्यम्** डेक्कन एजुकेशन सोसायटी, पुणे, 1963